# पुरुष सूक्तम् (ऋग्वेद)

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुळम् ॥ 1 ॥

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ 2 ॥

एतावानस्य महिमाऽतो ज्यायाश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ 3 ॥

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाऽऽभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ॥ 4 ॥

तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ 5 ॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मश्शरद्धविः ॥ 6 ॥

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्तः साध्या ऋषयश्च ये ॥ 7 ॥

तस्मात् यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूंतांश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्च ये ॥ 8 ॥

तस्मात् यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे त्समात् यजुस्तस्मादजायत् ॥ 9 ॥

तस्मादश्वा अजायन्तः ये के चोभयादतः ।
गावो ह जज्ञिरे तस्माज्जाता अजावयः ॥ 10 ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥ 11 ॥

ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ 12 ॥

चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ 13 ॥

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकागं् अकल्पयन् ॥ 14 ॥

सप्तास्यासन् परिधयः त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम् ॥ 15 ॥

यज्ञेन यज्ञमयन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः ॥ 16 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥